# NCERT Solutions Class 6 Sanskrit (Deepakam)

## Chapter 8 बुद्धिः सर्वार्थसाधिका

**वयम् अभ्यासं कुर्मः**

**१. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु ।**

**(क) सरोवरस्य तीरे सुकोमलभूमौ बिलेषु के निवसन्ति ?**
**उत्तरम्:** शशका:

**(ख) केषां परिभ्रमणेन शशकाः क्षतविक्षताः मृताः च भवन्ति ?**
**उत्तरम्:** गजानां

**(ग) शशकराजः कस्य समीपं गच्छति?**
**उत्तरम्:** गजराजस्य

**(घ) के स्वमतं प्रकाशयन्ति ?**
**उत्तरम्:** शशका:

**(ङ) कः चन्द्रं नमति ?**
**उत्तरम्:** गजराजः

**(च) के सुखेन तिष्ठन्ति ?**
**उत्तरम्:** शशका:

**२. पूर्णवाक्येन उत्तराणि लिखन्तु ।**

**(क) चन्द्रः कदा प्रसन्नः भवति ?**
**उत्तरम्:** यदा शशका: जीवन्ति तदा एव चन्द्रः प्रसन्नः भवति ।

**(ख) सायङ्काले केषां सभा भवति ?**
**उत्तरम्:** सायङ्काले शशकानां सभा भवति ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ग) शशकाः किमर्थम् उपायं चिन्तयन्ति ?**

**उत्तरम्:** शशकाः स्वरक्षार्थम् उपायं चिन्तयन्ति ।

**(घ) चन्द्रः केन नाम्ना प्रसिद्धः अस्ति ?**

**उत्तरम्:** चन्द्रः 'शशाङ्कः' इति नाम्ना प्रसिद्धः अस्ति ।

**(ङ) "आम्, चन्द्रस्य दर्शनाय आवाम् अधुना एव सरोवरं प्रति चलाव:" इति कः कथयति ?**

**उत्तरम्:** "आम्, चन्द्रस्य दर्शनाय आवाम् अधुना एवं सरोवरं प्रति चलावः ।" इति शशकः कथयति ।

**३. पाठस्य आधारेण पट्टिकातः क्रियापदानि चित्वा वाक्यानि पूरयन्तु ।**

**निवसन्ति चिन्तयन्ति भवति कथयति तिष्ठति**

**(क) किं चन्द्रः सरोवरे ............. ।**

**उत्तरम्:** तिष्ठति

**(ख) सर्वे शशका: उपाय .......... ।**

**उत्तरम्:** चिन्तयन्ति

**(ग) सायंकाले शशकानां सभा ......... ।**

**उत्तरम्:** भवति

**(घ) शशकाः सरोवरस्य तीरे ......... ।**

**उत्तरम्:** निवसन्ति

**(ङ) सः गजराजं .......... ।**

**उत्तरम्:** कथयति

**४. उदाहरणानुसारं निम्नलिखितानां पदानां वचनं पुरुषं च लिखन्तु ।**

| पदम् | पुरुषः | वचनम् |
|---|---|---|
| | | |

Get More Learning Materials Here : CLICK HERE www.studentbro.in

| | | |
|---|---|---|
| यथा – चिन्तयति | प्रथमपुरुषः | बहुवचनम् |
| तिष्ठन्ति | ............... | ............... |
| जीवन्ति | ............... | ............... |
| नमति | ............... | ............... |
| कथयति | ............... | ............... |
| गच्छति | ............... | ............... |

**उत्तरम्:**

| पदम् | पुरुषः | वचनम् |
|---|---|---|
| यथा – चिन्तयति | प्रथमपुरुषः | बहुवचनम् |

Get More Learning Materials Here : CLICK HERE www.studentbro.in

| | | |
|---|---|---|
| तिष्ठन्ति | प्रथमपुरुषः | बहुवचनम् |
| जीवन्ति | प्रथमपुरुषः | बहुवचनम् |
| नमति | प्रथमपुरुषः | एकवचनम् |
| कथयति | प्रथमपुरुषः | एकवचनम् |
| गच्छति | प्रथमपुरुषः | एकवचनम् |

**५. उदाहरणानुसारं समुचितैः क्रियापदैः रिक्तस्थानान पूरयन्तु।**

| **धातुः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| यथा- गम् | गच्छति | गच्छतः | गच्छन्ति |
| कथ् | कथयति | .... | |

Get More Learning Materials Here : CLICK HERE www.studentbro.in

| | | | |
|---|---|---|---|
| स्था | | | तिष्ठन्ति |
| कृ | करोमि | कुर्वः | |
| जीव् | | | जीवन्ति |
| चल् | | चलावः | |

**उत्तरम्:**

| **धातुः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| यथा- गम् | गच्छति | गच्छतः | गच्छन्ति |
| कथ् | कथयति | कथयतः | कथयन्ति |
| स्था | तिष्ठति | तिष्ठतः | तिष्ठन्ति |

Get More Learning Materials Here : CLICK HERE www.studentbro.in

| | | | |
|---|---|---|---|
| कृ | करोमि | कुर्वः | कुर्मः |
| जीव् | जीवति | जीवतः | जीवन्ति |
| चल् | चलामि | चलाव: | चलामः |

**६. चित्रस्य आधारेण पञ्च वाक्यानि लिखन्तु ।**

**उत्तरम्:**

(क) ...................

(ख) ..................

(ग) ..................

(घ) ..................

(ङ) ..................

**उत्तरम्:** (क) एतत् चित्रम् उपवनस्य अस्ति।

(ख) एष: वृक्ष: सेवफलस्य अस्ति ।

(ग) वृक्षस्य अधः सेवफलानि सन्ति ।

(घ) सेवफलानि खादित्वा बालकाः प्रसन्नाः भवन्ति ।

(ङ) सेवफलस्य वर्णः रक्तः अस्ति ।

**७. अधोलिखितानां पर्यायपदानां मेलनं कृत्वा रिक्तस्थानानि पूरयन्तु ।**

**उत्तरम्:**

(क) गजः हस्ती

(ख) पदम् चरण:

(ग) चन्द्रः शशाङ्क:

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(घ) सरोवर: जलाशय:

(ङ) प्रजा जनता

**योग्यताविस्तरः**

१. कार्यारम्भात् कार्यपरिसमाप्तेः कालः वर्तमानकालः उच्यते ।
२. वर्तमान कालस्य कृते लट्लकारः भवति ।
३. लकारेषु त्रयः पुरुषाः (प्रथम मध्यमः उत्तमः) एवञ्च त्रीणि वचनानि (एकवचनम् द्विवचनम् बहुचनम्) भवन्ति ।

**लट्लकारस्य क्रियापदे अधोलिखितानि चिह्नानि भवन्ति ।**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | ति | तः | अन्ति |
| मध्यमपुरुष: | सि | थः | थ |
| उत्तमपुरुष: | मि | वः | मः |

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|

Get More Learning Materials Here : CLICK HERE www.studentbro.in

| | | | |
|---|---|---|---|
| प्रथमपुरुष: | पठति | पठतः | पठन्ति |
| मध्यमपुरुष: | पठसि | पठथः | पठथ |
| उत्तमपुरुष: | पठामि | पठावः | पठामः |

**परियोजनाकार्यम**

पाठे पठितानां धातुरूपाणां संग्रहणं कुर्वन्तु। तेषां पुरुषं वचनं च लिखन्तु।
उत्तरम्:

**पठित-अवबोधनम्**

**पठित- सामग्रीम् आधृत्य अवबोधनकार्यम्**

**१. निम्नलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

(निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए)
गजराजः शशकेन सह सरोवरस्य समीपं गच्छति। सः जले चन्द्रस्य प्रतिबिम्बं पश्यति चकितः च भवति। सः भयेन चन्द्रं नमति। ततः सः गजयूथेन सह अन्यत्र गच्छति। सः गजयूथः पुनः कदापि तस्य सरोवरस्य समीपं न आगच्छति। शशकाः तत्र सुखेन तिष्ठन्ति। सत्यम् एव उक्तम् -'बुद्धिः सर्वार्थसाधिका।'।

प्रश्ना:-

**I. एकपदेन उत्तरत-**

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(i) कः भयेन चन्द्रं नमति ?**

**उत्तरम्:** गजराज :

**(ii) गजराजः जले कस्य प्रतिबिम्बम् पश्यति?**

**उत्तरम्:** चन्द्रस्य

**(iii) गजराजः केन सह सरोवरस्य समीपं गच्छति ?**

**उत्तरम्:** शशकेन

**(iv) के सुखेन तिष्ठन्ति ?**

**उत्तरम्:** शशका:

## II. पूर्णवाक्येन उत्तरत-

**गजयूथः पुनः कदापि कुत्र न आगच्छति ?**

**उत्तरम्:** गजयूथः पुनः कदापि सरोवरस्य समीपं न आगच्छति ।

## III. निर्देशानुसारं उत्तरत-

**(i) 'जले' अत्र का विभक्तिः ?**

(क) प्रथमा

(ख) तृतीया

(ग) पञ्चमी

(घ) सप्तमी

**उत्तरम्:** (घ) सप्तमी

**(ii) 'तिष्ठन्ति' इत्यत्र कः धातुः ?**

(क) तिष्ठ्

(ख) स्थ

(ग) स्था

(घ) स्थ

**उत्तरम्:** (ग) स्था

Get More Learning Materials Here : CLICK HERE www.studentbro.in

## २. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-

**(i) <u>शशकाः</u> स्वरक्षार्थं उपायम् अचिन्तयत् ।**
**उत्तरम्:** <u>के</u> स्वरक्षार्थं उपायम् अचिन्तयत् ?

**(ii) वयम् शशकाः <u>तस्य</u> प्रजाः स्मः ।**
**उत्तरम्:** वयम् शशकाः <u>कस्य</u> प्रजाः स्मः ?

**(iii) चन्द्रः <u>सरोवरे</u> तिष्ठति ।**
**उत्तरम्:** चन्द्रः <u>कुत्र</u> तिष्ठति ?

**(iv) <u>शशकराजः</u> गजराजस्य समीपं गच्छति ।**
**उत्तरम्:** <u>कः</u> गजराजस्य समीपं गच्छति ?

**(v) गजराजः भयेन <u>चन्द्रम्</u> नमति ।**
**उत्तरम्:** गजराज भयेन <u>कम्</u> नमति ?

## ३. मञ्जूषातः समानार्थकानि पदानि चित्वा लिखत-

**(i) रविः .................**
**(ii) चन्द्रः .............**
**(iii) जलाशयः ..........**
**(iv) हस्ती ..............**
**(v) तीरे ............**

**उत्तरम्:** (i) रविः सूर्यः
(ii) चन्द्रः शशाङ्कः
(iii) जलाशयः सरोवरः
(iv) हस्ती गजः
(v) तीरे तटे

## ४. कथापूर्ति

**मञ्जूषायाः उचितपदैः कथापूर्तिः कुरुत –**

Get More Learning Materials Here : CLICK HERE www.studentbro.in

पिपासाकुलं क्षतविक्षताः, वासस्थानम्, सरोवरस्य, नित्यजलपूर्णः, शशक- बिलानि, उपाय, सह, प्रसन्नः, प्रतिबिम्बम्

एकस्मिन् वने एकः ........(i) ......... महान् सरोवरः अस्ति। कदाचित् एकं .......(ii)....... गजयूथं वनान्तरात् तत्र आगच्छति। तस्य च सरोवरस्य तीरे समन्तात् सुकोमलभूमौ बहुनि ...........(iii)........ सन्ति, येषु बहवः शशकाः निवसन्ति । गजानां परिभ्रमणेन तेषु बिलेषु बहवः शशकाः .......(iv)........ भवन्ति । ते दुःखम् अनुभवन्ति । स्वरक्षार्थं च ते .....(v)..... चिन्तयति ।। शशकराज : गजराजं कथयति – " हे गजराज ! एषः सरोवरः चन्द्रस्य .......(vi)........ अस्ति । यदा शशकाः जीवन्ति तदा एव चन्द्रः ......(vii)....... भवति । " गजराजः शशकराजेन ........(viii)...... सरोवरस्य समीपं गच्छति । सः जले चन्द्रस्य ......(ix).... पश्यति । सः गजयूथः पुनः कदापि ........(x) ....... समीपं न आगच्छति ।

**उत्तरम्:** (i) नित्यजलपूर्णः

(ii) पिपासाकुलं

(iii) शशक – बिलानि

(iv) क्षतविक्षताः

(v) उपायं

(vi) वासस्थानं

(vii) प्रसन्नः

(viii) सह

(ix) प्रतिबिम्बम्

(x) सरोवरस्य

Get More Learning Materials Here : CLICK HERE www.studentbro.in